पयन्ति राजा भगवन्प्रागपिसोऽस्माभिरर्थ:

शाकुं. २ त्यादिष्ट एव किंवृथा तर्केणान्विष्यते विश्राम्यतु

५३ भवान् पुरोहितः विलोक्य विजयस्वेति निष्क्रान्तः

53 राजा वेत्रवति पर्याकुलोस्मि शयनभूमिमार्ग

मादेशय प्रतीहारी इदो इदो देवो प्रस्थिता

राजा कामं प्रत्यादिष्टं स्मरामि न परिग्रहं मुनेस्त

नयां बलवत्तु दूयमानं प्रत्याययतीव मे हृदयं

इति निष्क्रान्ताः सर्वे पंचमोंकः ततः प्रविशति ना

गरिकश्यालः पश्चाद्बद्धं पुरुषमादाय रक्षिणौ च

रक्षिणौ ताडयित्वा अले कुंभिलअ कहेहि

कहिं तुए एसे मणिबंधणुक्किण्णणामहेए लाअ

कीअए अंगुलीअए समासादिदे पुरुषः भीति

नाटितेन कं

केनपसीदंतेभावामिश्रशो म्रहकोरार्ईदिथाकम्म
काली प्रथम: किंरवुश्मेहशौवहारोग्निका। रो:
लिम्मसणापडिम्गाहेदिम्मेवुरूथ: सुरापदा।
गाग्मह केशाकावदालभ्नलवाशरीथीवले
द्वितीय: पाटम्रलाकिंम्रम्हेहिज्नादीभुषिदे
श्याल: स्त्चम्मकहेडुसवुंकमेरामाराम्मतरो म्राणक
जं पडिवंघह डभो म्राभुयेम्रांगावेदिकहेहि थु
कुष: म्रहकेजालुगालारिहिमघ्रवंघरागवालहिं
कुडुवमलरंकलोमि श्याल: विस्त्वाविश्नुच्छोद
रांम्माजीवोडरुय: भद्द सहजोकिलजोविपिं
दिएगाडम्देकम्ममविवज्रुराग्मिंकपषुमालनकाम्म

54

[illegible]

ह जाबस्सं संगुलीस्स संजलाग मरागं भहिरको
णि वेदि अन्तसेसासरांपडिछि आरीाक्कमाणि
उंओ पविसदुक्कावुगेशााभीयसादत्तसति।
स्कांतः श्यालः प्रथमः जातातुक्काचिरक्कादि
खुक्काउते द्वितीयः रांक्कवत्वलोपसप्याणि।
आलकिद्याराणि प्रथमः जाराक्कफुलतिमेह।
त्थारमत्तसुमरणोपिराद्धकरुवाविार्दिशाति
पुरुषः रागलु हदिभावे अकालणाामालुरोभं।
विडुं द्वितीयः विलोकउ एशेअमहारापयामी
पत्तहछलाअरणशरांपडिछिअईदोसुहद
रुवीअदिगिद्धवलीभाविसासिपुरागो मुंहवो

शकुंत. देविस्वास सि प्रविश्य श्यालः सूचअ अणुवेडुए

५५ सेजालो अजीविडअवसे किल अक्कं अंगुली

अअ सक्क अअसे सूचकः णडु अआकुत्तो भणाएदि

55 द्वितीयः एसो जम सुद्द साणं पविसिअ पडिएि

कुत्तो पुरुषःपरित्तकं कधं पतिकरोमि पुरुषःश्या

लं अअगाअअ भहा अअहकी अलि सेमे आजीवे श्या

भ लः एसो पुहुवि अअ अंगुली अअ अवं अहलाम अवि दोव

सासो विदा विदो पुरुषः पार्थं प्राति पुरुषः

सप्रगाम पसरि अहम हके अणुगाहि दम्भि

सूचकः एशो णम अअ अफगाहेजे अलादोअवदाति

अहं विक्कं धेपडिअ्हिदे जाणुकः आवुत्तपालिते

शंकहेहितेराम्भंगुलीभिरणामहिनोधाम्मं दे
नगाहिदत्वे श्याल: रान्नास्तिमलाकहंदणाभे
हिरणोवकुमैंदकितद्वोमितस्सबंस्सरोमहिणो
भ्राभिमदेजरणाहमारिदेफ्फुनभ्रपाकिहिगोभी
गोविफ्फुहुरम्रामम्रराघ्ररागेञाहि स्वकः
शेविदराफ्फम्रावुनेरण जानुकः रामरामस्कम
शाकएमाखियाभ्रहुरारनेतुरुधमस्तूयथापश्य
निजतथ: महालकोरदेफ्फहुमहारागुमरणोमु
लं होतुजातुकः लनकेडुजुई श्याल: धीवर
मललराचुमपिम्रवम्रससकोकापिमेशाजुन को
दवीतिरवेम्रक्रममहारापटम्मसोहिदहुञाघ्रार

शाकुंत ५६ तासोडिक्षापरागएव्वगच्छामो इतिनिक्रांत्ताःस
र्वेस्तृतीयःप्रवेशकः ततःप्रविशत्याकाशयाने
नसानुमतीनामाप्सरा सानुमती णिव्वुत्तिदंमए
56 पज्जाअस्सणिवत्ताणिजुंअच्छरातित्थसाण्णिज्झंजा
वसाहुजणस्सअभिसेककालोत्तिसंपदंइमस्स
सि राएसिणोउदंतंपच्चक्खीकरिस्सं मेणाका
संबंधेणसरीरभूदाणिमेसउंदलाताएअदुहि
दुणिमित्तंआदिट्ठपुव्वम्हि समंतादवलोक्यकिंणु
क्खुउदुउच्छवेविणिरूच्छवारंभंविअराअउलंदी
सइअत्थिमेविहवोपणिधाणेणसव्वंपरिण्णादु
किंदुसहीएआदरोमएमाणइदव्वोहेःकुसुमाराए

कंडुआणगयपालिक्किआराणंत्ति चक्कवरिगणिपडिछो ॥
गणपरसपरिवाणिगणिभाविक्कउवलंभिस्सं
नाघेनावतीर्यास्थिताननः प्राविशान्निचूतां
कुलमवलोकयंतौ वेटी अपराच वटस्तुतनन्तस्याः
प्रथमम्भाग्निवहंहिम्मिपंडुर वसंतमासस्सजीक्क
मघस्सदिहोसिरूदकोम्मरडुमंगलतुमपसाए ॥
मिद्वितीयापरंजदिएकिंम्भाग्ग्रीष्मिम्मोसि प्र
थमा मङ्गअरिएउदकालिप्पदाकिक्कउम्मत्ति ॥
अपरजुप्पिक्किग्गहोदि द्वितीया सहर्ष त्वरयोप
गम्यकहंउवस्थिदोम्हुमासो प्रथमा मङ्कअरिए
नवदाणिंकालोएसोमदवि भ्रमणीदाणिं द्विती

शाकुंत॰ या सहिअवलंबअंडावअस्सगणादहिअस्साअभविस्सदू
५७ दकालिअंगेरिहअकामदेवअच्चणंकरोमि प्रथमा
जइममाविरवुअस्सहुं अच्चणस्सफलसत्थु द्वितीया
57 अकाहिदेविएदस्सपञ्जरइजदोसहिअसवणंजीवि
दंडुधाअडिदस्सविरसस्सवीअवलंव्वासस्थिणअचूदाकुर
गहणात्ति अस्सअडिकुम्मोविचूदपस्सवोएहुसुव
घराभूगएकसीहोदिकपोतहदलकलकञ्जाकासे
९ मयगदंकुरादिणाकामस्सअगहिदधराअस्सरस
पहिअजणाजुवइलक्खावपचङ्गहिदेसरोहोहि
शत्तिचूतांकुरादिपत्रिभाविशयपटादेपेणाकु
पितकुंचकी मात्तावदत्ताणमणदेवेनप्रतिसिद्ध
हूं:

वसंतोत्सवेत्वमाम्रकालिकाभंगंकिमारभसे

:उभेभीत्रिपरसी॰ ॐ मञ्जुोक्षगाहिदृष्णावश्यं कं

चुकीनाकिलप्रकृतयुवाभ्यांयछासंत्रिकैसक:

भिरपि देवस्य शासनंप्रमाणीकृतं तदाम्र:

यिभि:पत्रिभिश्च तथाहि चूतानांचिरानि

र्गतापिकालिकावध्नातिनरवंरज: सन्नदूयद

पिस्थितंकुरवककन्यकोरकावस्थयाकंठेथु

स्खलितंगतोपिशिशिरेकुरवकोविलानारका।

शंकेसहरात्रिस्मरोपिचाकिनन्ततर्णोर्द्धकुथंश

रं उभे राद्धिसंदेहोम घ्यहलवोरा ऌसी प्रथ

मा मञ्जुतानिर्दिष्टमहाईश्रम्हाराणामिनावकदुराणा

शाकुंत. ५८

58

ट्ठिएणणभट्टिणीपाअमूलंपेसिदत्ता इहंच
रोणायमदवणस्सपालनकम्मसमाप्पिदंता।
: त्तामंतंएव्वदाएआस्सउदएवुत्तस्स मेहिंएस्सो।
वुत्तंतो कंचुकी भवत्तनवुनरेवंप्रवेसितव्यं
उभे अज्जकोहूहललंणाजइ अम्मेरणाजणेण
सोदव्वंकहेदुअज्जोकिंणिमित्तंभट्टिणावसं
न्तस्सवोपाडिसिद्धो सानुमती उस्सवप्पिआ
खुमणुस्साणुकारणाकालणकारणेणहोदव्वं कं
चुकी बहुलीभूतमेतन्नकिंनकथ्यते किम
त्रभवत्योःकर्णपथंनायातंशाकुन्तला
प्रत्यादेशकौलीनं उभे सुदंरट्ठिआमुहादो।

जातकमंगुलीयकसंदर्शनं कंचुकी नैतत्खलुप्रक
थयितव्यं यदैवखलुस्वांगुलीयकदर्शनाद
नुस्मृतंदेवेनसत्यमूढपूर्वामयातत्रभवतीर
हसिशकुंतलामोहात्प्रत्यादिष्टेतितदाप्र
भृत्येवपश्चात्तापमुपगतोदेवः तथाहि रम्यं
द्वेष्टियथापुराप्रकृतिभिर्नप्रत्यहंसेव्यतेश
य्यांप्रांतविवर्तनैर्विगमयत्युन्निद्रएवक्षपाः
दाक्षिण्येनददातिवाचमुचितामंतःपुरे
भ्योयदागोत्रेषुस्खलितस्तदाभवतिचव्रीडा
विलक्षश्चिरं सानुमती प्रियंमे कंचुकी अस्मा
त्प्रभवतोवैमनस्यादुत्सवःप्रत्याख्यातः उभे

शकुंत॰ ५९

जुई नेपथ्ये एदु एदु भवं कंचुकी कार्यं दत्वा
खल्वेतत्तएवमभिवर्तितो देवः स्वकर्मानुष्ठीय-
तां उभेनहस्तिनानिष्कृति ततः प्रविशति पश्चा
त्तापसदृशवेषो राजा विदूषकः प्रतीहारी च
कंचुकी राजानमवलोक्य अहो सर्वास्ववस्थास्वाप्त
रमणीयत्वमाकृतिविशेषाणां एवमुत्सुकोपि
प्रियदर्शनो देवः तथाहि प्रत्यादिष्टविशेषमंडः
नविधिर्वामप्रकोष्ठार्पितं बिभ्रत्काचनमेकमे-
व वलयं श्वासोपरक्ताधरः चिंताजागरणप्रतांत
नयनस्तेजोगुणादात्मनः संस्कारोल्लिखितो म
हामणिरिव क्षीणोपि नालक्ष्यते सानुमती राजा

59

नं हृष्ट्वा ठाणो क्खु पच्चादेसविमाणिदा वि इस्स सकिदे
शउन्दला किलम्मदि त्ति राजा ध्यानमन्दं परिक्र
म्य प्रथमं सारंगाक्ष्या प्रियया प्रतिबोध्यमानम
पि सुप्तं अनुशयदुःखायेदं हतहृदयं संप्रति वि
बुद्धं सानुमती णं ईदिसाणि तवस्सिणीए भा
अधेआणि विदू अपवार्य लंघिदो एसो भूओ
वि सउंदलावाहिणा ण आणे कहं चिकित्सिद लोक
व्वो भविस्सदि त्ति कंचुकी उपगम्य जयतु देवः
महाराज प्रत्यवेक्षिताः प्रमदवनभूमयः यथा
काममध्यास्तां विनोदस्थानानि राजा वेत्र
वति मद्वचनादमात्यमार्यपिशुनं ब्रूहि चिरप्रबो

शाकुं॰ ६॰

60

यत्नात्संभावितमस्माभिरद्य धर्मासनमध्या
सितुं यत्प्रत्यवेक्षितं पौरकार्यमार्येण तत्पत्र
मारोप्य दीयतामिति प्रतीहारी जं देवो आणा
वेदि त्ति निष्क्रांता राजा वातायन त्वमपि
स्वनियोगमशून्यं कुरु निष्क्रांतः कंचुकी वि
दूषकः किदं भवदा णिम्मक्खिअं संपदं सिसि
रातवच्छेदरमणीए इमस्सिं पमदवणुद्देसे अत्ता
णं रमइस्ससि राजा वयस्य रंध्रोपनिपातिनो
नर्था इति यदुच्यते तदव्यभिचारि वचः कुतः
मुनिसुताप्रणयस्मृतिरोधिना मम च मुक्तमिदं
तमसा मनः मनसिजेन सखे प्रहरिष्यता धनु

रा

खिहूतरस्सवत्तिवेशिन: विदूषक: चिहुदाव
इमिरायादेडकोलोणकंदरथवाहिरगसहस्सामि
इतिदंडकाखुमडयम्यचूतावकारंपात्तायितोमिछ
त्ति राजा सस्मितं भवकुहसंवससवच्चसे सरवे
कोपाविष्ट: क्रियाया: किंचिदनुकोहितोविलत
ण्ठिहपिंविलेसियामि विदू रत्नमासस्समपडिष्ठा
रिक्षाविडुरिक्षाभवदासदिदुआमा यवीमिडयरमवो। वे
इमवेलक्षतिवाहरस्स: नाहिचमेवित्तफलम्रागादं
सत्तस्थलिहिदंतनसदीएपडिकिंदिक्षारोहित्ति
राजा २ हसोहदयविनोदस्यानतनमेवमार्गमा
देशाय विदू ३ दोइदोभवडमोपरिक्रामत: सा

शाकुंत॰ नुमती अणुगच्छति विदूसओ मणिसिलापट्ट-
६१ असणाहो माहवीमंडवो उवहाररमणिज्जदाए ताए
61 णिस्संसअं साअदेण विअ णो पडिच्छदि ताव
पविसिअ णिसीददु भवं उभौ प्रवेशं कृत्वोपविष्टौ
सानुमती लदासंसिदा देक्खिस्सं दाव सहीए
पडिकिदिं तदो से भत्तुणो बहुमुहं अणुरा-
अं णिवेदयिस्सं तथा कृत्वा स्थिता राजा
सर्वमिदानीं स्मरामि शकुन्तलायाः प्रथमवृ-
त्तान्तं कथितवानस्मि भवते च स भवान् प्रत्या-
देशवेलायां मत्समीपमुपगतो नासीत् पूर्वमपि न त्व-
या कदाचित् संकीर्तितं तत्रभवत्याः नाम कच्चिदह

मिवविस्मृतवानासिंव विदू रावि स्मरतामि किंनस
ढंकलिम्भ्रमवसाणोऽगानुप्पपरिहासविश्रम्भस्मो
राम्हस्योक्तिश्राचविश्रम्भमद विभाव्येहंडुवृहिंवन्त रा॰
हप्पंगाहिस्म्रहवाभाविदवृदावलवद्दी मातृमती
एवपदं राज्ञा ध्यात्वा सरवेत्राप्यस्यमां विदूषकः
भोः किंपदं श्राणुववसं रवुदिदसंनु ईकादा विसपुरी
मासेश्चकनवाणाहोति पवादे विरांगुकुपामगिरिऊ
: रञ्जवयस्यानिरपकरणाविलावाया: प्रियाया: सम
क्स्याम्मनुस्मरत्यवलवद्शरणोगास्मिसाहिर्इनः प्र
व्यादेशात्कुतमनुमंत्रव्यवसिनामऊत्लिवेनुपै
दैवनिपऊशिष्येमनुरुसमेऽनाहींहिंवाव्यप्रकारको।
६३

तुवामर्पितवतीमयिक्रूरेयत्नक्षमाविषमिवशल्यं
दहतिमां सानुमती अम्मो ईदिसीकज्जपरद
स्सस्सदावेक्खाअण्णत्तहत्थमाणमि विदू० भोअस्तितुं
मन्तकोवेणाविनत्रहोदीअअस्सचारिणीरी
दैति राजा कः पत्निदक्तामन्यः परिमाकुमकुसा।
दैव मेनका किलसख्यास्तेजन्मप्रतिष्ठातेयुतवा
वेस्मितन्सहचारिणीभिस्समरबानेहृत्तोमिमेह
दयमाशंकते सानुमती संमोहोक्खुविम्हआलि
ज्जोरागपडिवोहो विदू० जइएव्वंख्खुआलिएवसमाश्व
सोकालेनतत्रहोदीए राजा कथमिव विदू० ता
दुमादापिदाअभिक्खिश्राम्सदुःखिनंदुहिदरं दे।

प्रेसमागमः वाग्यस्तालस्दान्येतांदूरं विच
गताम्मपि सानु सब्बलपमाद्धिसंलएब्बादेस
उःखंसउंरलाए. प्रविश्यचकोरिका जेदुभट्टा:
वड्ढिय्याकंडय्यगेरिहय्यस्सोहिलंपाहिदाम्हि
. राजा किंणाचकोरिका चकोरिकासोमहय्यो
देप्पत्तणपरालिय्यादुरिय्याएदेवीएवंसमदी.
एय्यहत्थेच्चयसुजाउलसस्सउकाणाईस्सांनिसवकुा —ल
रणहिदो विह दिद्धिय्यात्तुमंसुवको चकु: जाव
देवीएविंडवलणाउत्तरीय्यत्तरलिय्यासोचेदित्ता
वमणेणिवाहिदेय्यत्ता राजा वयस्सङ्पस्थि
तादेवीवक्कमाननाविंताव भवानिमांप्राप्ति.

न
शाकुंला ६८

68

कुतिरंदाणु विहू अत्तातांतिभणाहि चित्रा-
फलकमादायो पायच्छजं भवंकं नेउरकाल
दूदो गुंजकिअरितदोमिमेह पडिछंदे पासादे
दावीहि तिहु तिहुत्तपदं निष्क्रांताः साउ अस्मत
केनाहि कस्त्रेण विपठमसंभावरां अप्रवेकल्वाद्वित्र
सिटिलसो हदो पणिएं एसो प्रविश्य पत्रहस्ता
प्रतीहारी जेदु देवो राजा वेत्रवति न खलु
एदस्स च पादेवीपत्तीअहई पत्तहत्थं मंदो किव
अपडिणोइत्ता राजा कार्यलाभकार्यो परोथमेव
रिहरंति प्रीतीदवम्नमस्त्रोविक्षवीस्त्रह्यजादस्स
गणानाव फलदाए एक्को एव्व पारकजं अव्वो किवदा-

तेदेवोपत्नाहलंपत्त्रकवीकरेदुत्ति राजा इतःप
त्रिकांदर्शय प्रतीहारी उपनयति राजा अनु
वाच्यकार्यंसमुद्रव्यवहारीसार्थवाहोधनमित्रो
नामनौव्यसनेविपन्नः अनपत्यश्चकिलतपस्वी
राजगामीतस्यार्थसंचयइत्येतदमात्येनखितं लि
कष्टंखल्वनपत्यतावेत्रवतिबहुधनत्वाद्बहुपत्नीकेनत
त्रभवताभवितव्यंविचार्यतांयदिकाचिदापन्नसत्वा
तस्यभार्यासुस्यात् प्रतीहारी देवदाणिंएव्व
साकेदअस्ससेट्ठिणोदुहिदाणिव्वुत्तपुंसवणा
जाआसेसुणीअदि राजा ननुगर्भःपित्र्यंरि
क्थमर्हतिगच्छएवममात्यंब्रूहि प्रतीहारी

शकुंत. जदेवो आणवेदि त्ति प्रस्थिता राजा एहि ताव
६९ दू प्रती इयंम्हि राजा किमनेन संततिरस्ति नास्ती
ति येन येन वियुज्यन्ते प्रजाः स्निग्धेन बंधुना।
स स पापादृते तासां दुष्यन्त इति घुष्यतां प्रती
एवं णाम घोसइदव्वं निष्क्रम्य पुनः प्रविश्य
काले पउट्ठं विअ अहिणंदिदं देवस्स सासणं।
राजा दीर्घमुष्णं च निःश्वस्य एवं भोः संततिच्छेद
निरवलंबानां कुलानां मूलपुरुषावसाने संपदः
परमुपतिष्ठंति ममाप्यन्ते पुरुवंशश्रीरकाल
इवोप्तबीजा भूरेवं वृत्ता प्रती पडिहदं अमंग।
लं राजा धिङ्मामुपस्थितश्रेयोवमानिनं ।

सेयि उद्भ्रांतकेननिष्क्रांता नेपथ्ये अब्रह्मण्यं या
ज्ञाकरां दत्वा अयमाठ्यस्यैवार्त्तःस्वरः कः कोत्र
भोः प्रविश्य प्रतीहारी परित्तायदु देवो संसभ्रम
देवबझस्स राजा केनात्तगंधीमारावकः प्रती
बे कोदिद्धहत्थणकेणा विसत्तेराम अरिद्धकाम्मिअमे स्व
रिखेहदत्तपासादस्स अग्गभूमिआरोविदो राजा
उत्थाय मानावतमममापिसंतैरभिभूयते कष्टं हा
अथवा आत्मन्यहन्त्यात्मनएवतावत्तावत्प्रमा
दस्खलितंन शक्यं प्रजासु कः केनपथ्याप्रयाः
नोत्थशाखितोवदित्तुमालिशात्किः नेपथ्ये भो
भवस्मश्राविदः राजा गतिभेदेनपरिकामन्नस

शाकुंत. इवेलभेत्तवंअंतरेणपव्वे पुनस्तदेवपठित्वाकहंसामा
७१ ईस्सए समंकोविपच्चकरादसिरो हरंइकखुभिक्व
द्वि: तिकण्वभंगंकरेवि राजा सदृष्टिक्षेपं धनुस्ताव
71 नुप्रविश्यपशाङ्ग-हस्तापवानिका भट्टा एदंहत्था
वापसाहिदसरासणं राजा सशरं धनुरादत्ते
पथ्ये एषत्वामभिनवकंठशोणितार्थीशार्ङ्ग-
लेःपशुमिवहन्मिचेष्टमानं श्रान्तिविभयम
पतेतुमानं धन्वादुष्यंतस्तवशरणंभवान्विदा
नीनभविष्यसि शार्ङ्ग-मारोप्यवेत्रवतिसोपान
मार्गमादिशायमंतीहारी इदोइदोदेवोसर्वेसत्व
रमुपसर्पतिति राजा समंताद्विलोकयनंसख

राजा सरोषं कथंममोपेवाहिशति विद्रुकुरापोशानत्वमिदानीं: २

तुमं शंपा ९ रत्नस्मासि

लिदं नेपथ्ये अविह २ अहं अन्नभवंतंपे
कत्वापर्णिविडालगाहिन्दोम्रू सक्कोपाविक्खारिगरा
सोम्हि जीविदसंवुत्तो रज्जा सोस्ति सक्कारि
गीगार्वित्तमदीयशरङ्गं त्वांद्रूह्यान्तिल्खन्न : मि
शुंसंदधे योहतिष्यन्तिवर्ध्यां त्वांरहत्यरहत्यति
वक्रिज्जु हंसोहिहीरमादतैनान्निमष्प्राविकर्जायतप
पः सत्वंचसंघतानान्तः प्राविशन्तिविहूयकन्तुरू
ज्यमानालिः मानालिः कृत्ता शरव्याहिरातता
वासराः शरासनंतेभुविक्षिप्यनागमिदं प्रसाद
सौम्यानि सत्त्वानि सहहुने पर्णान्निवदह्यितसां
गाः श्रारा : राजा श्रवत्तमुपसंहरन् श्रयमानः

शकुंत. लिः स्वागतं महेन्द्रसारथ्ये प्रविश्य विदूषकः अ
७२ हं जेण इट्ठिपसुमारं मारिदो सो एसो राआणाअ अहि
णंदीअदि मातलिः सस्मितं आयुष्मन्
श्रूयतां यदस्मि हरिणा भवत्सकाशं प्रेषितः
राजा अवहितोऽस्मि मातलिः अस्ति कालनेमि
प्रसूतिर्दुर्जयो नाम दानवगणः राजा अस्ति श्रु
तपूर्वं मया नारदात् मातलिः सख्युस्ते स किल
शतक्रतोरवध्यस्तस्य त्वं रणशिरसि स्मृतो नि
हन्ता उच्छेत्तुं प्रभवति यन्न सप्तसप्तिस्तन्नैशं ति
मिरमपाकरोति चंद्रः स भवानात्तशस्त्र एवमि
दानीं तमैन्द्रं रथमारुह्य विजयाय प्रतिष्ठतां

72

राजा अनुगृहीतोऽहमनया मत्प्रवृत्तेः संभावनया
यस्मात्त्वं प्रतिभवनानि किमेवं प्रत्युक्तो मात
लि: लि तदपि कथ्यते किंचिच्छ्रीमिताद्यपि मनः।
संतापादाप्रभृत्यामनया विलक्षो ह्यहं पश्चात्को
पि तुम्प्रमुखं तन्न्याहृतवानस्मि कुतः
ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां
कुरुते प्रायः स्वं महिमानं क्षोभात्प्रतिपद्यते हि
जनः राजा जनान्तिकं वयस्य जनान्तिकमरणी
पार्श्वस्थस्तेषाहत्तावद्गत्रपरिगतार्थं कृत्वाम
हुवनादस्मात्सापि प्रतिबूहि: वयस्य प्रतिकेवला
नावधार्य परिपालयितुं प्रजाः आधिज्यामिदम

शाकुंत॰ रथस्मिन्कर्मणि व्याप्तं धनुः इति किंद्र जंभा
७३ वंश्रमाणावेदितानि:क्रांत: मातलि: आयुष्मा
न्रथमारोहतु राजा रथारोहणं नाटयति
इति निःक्रान्ताः सर्वे षष्ठोंकः ततः प्रविश
त्याकाशयानेन रथाधिरूढो राजा राजा
मातलिश्च मातले अनुष्ठितनिदेशोपि
मघवतः सत्क्रियाविशेषादनुपयुक्तमिवा
त्मानं समर्थये मातलि: सस्मितं आयुष्म
न्नुभयमप्यपरितोषं समर्थये प्रथमोपकृ
तं मरुत्वतः प्रतिपत्त्यालघुमन्यते भवान् ग
णयत्यवदानविस्मितो भवतः सोपि न सत्क्रि

याद्गुणान् राजा मातले मा मैवं खलु मनोर
थानामथभूमिर्विसर्जनावसरसत्कारः म
म हि दिवौकसां समक्षमर्द्धासनोपवेशित
स्य अंतर्गतप्रार्थनमंतिकस्थं जयंतमुद्वीक्ष्य
कृतस्मितेन आमृष्टवक्षो हरिचंदनांका मं
दारमाला हरिणा पिनद्धा मातलिः किमि
व नामायुष्मानमरेश्वरान्नार्हति पश्य २ सुख
परस्य हरेरुभाभ्यां कृतं त्रिदिवमुद्धृतदानवकंटकं
नव शरैरधुना नतपर्वभिः पुरुषकेसरिणश्च
७१ पुरा नखैः राजा अत्र खलु शतक्रतोरेव महिमा
स्तुत्यः सिद्ध्यंति कर्मसु महत्स्वपि यन्नियोज्याः

संभावनागुणामवेहितमीश्वराणां किंवाभवि
ष्यदरुणस्तमसांविभेत्तातंचेत्सहस्रकिरणो
धुरिनाकरिष्यत मातलिः सदृशमेवैतदायु
ः लोकमनंतरमतीत्यकमायुष्मन्नितः पश्यना
कपृष्ठगतस्यसौभाग्यमात्मयशसः विछि
त्तिशेषैःसुरसुंदरीणांवर्णैरमीकल्पलतांशुकेषु
संचिंत्यगीतक्षममर्थजातंदिवौकसःत्वच्चरितंलि
खंति राजा मातलेअसुरसंप्रहारोत्सुकेनपूर्वेद्यु
र्दिवमधिरोहतानलक्षितःस्वर्गमार्गःकतरस्मिन्म
रुतांपथिवर्तामहे मातलिः त्रिस्रोतसंवहति
योगगनप्रतिष्ठांज्योतींषिवर्तयतिचप्रविभ

कराश्मिः नस्यद्भिर्जीयहरिविक्रमनिस्तमस्कं
वायोरिमंपरिवहस्यवदंतिमार्गं राजा मात
लेऽतःखलुसबाह्यांतःकरणोममांतरात्मा
प्रसीदतिरथ्यांगमवलोक्यमेवपदवीमवतीर्णौ
स्वः मातलिः कथमवगम्यते राजा अयम
विवरेभ्यश्चातकैः निष्पतद्भिः हरिभिरचिरभासां
तेजसाचानुलिप्तैः गतमुपरिघनानांवारिगर्भो
दराणांपिशुनयतिरथस्तेशीकरक्लिन्ननेमिः
मातलिः क्षणादायुष्मान्स्वाधिकारभूमौ
वर्तिष्यते राजा अधोवलोक्यवेगावतरणादा
श्चर्यदर्शनःसंलक्ष्यतेमनुष्यलोकः तथाहि

शाकुंतलम शैलानामवरोहतीवशिखरादुन्मज्जतांमेदिनी।
७५ पर्णस्वांतरलीनतांविजहतिस्कंधोदयात्पा
75 दपाः संतानैस्तनुभावनष्टसलिलाव्यक्तिंभ
जन्त्यापगाः केनाप्युत्क्षिपतेवपश्यभुवनंम
त्पार्श्वमानीयते मातलिः साधुदृष्टंसबहु
मानंविलोक्य अहोउदाररमणीयापृथिवी
राजा मातलेकतमोयंपूर्वापरसमुद्रावगाढः।
कनकरसनिष्यंदीसांध्यइवमेघपरिघःसानु
मानालोक्यते मातलिः आयुष्मन्नेषखलु
हेमकूटोनामकिंपुरुषपर्वतस्तपःसंसिद्धिक्षेत्रं पर्व
पश्य स्वायंभुवान्मरीचेर्यः प्रबभूवप्रजापतिः

सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति राजा तेन।
हि अनतिक्रमणीयानि श्रेयांसि प्रदक्षिणीकृत्य
भगवंतं गंतुमिच्छामि मातलिः प्रथमः कल्पः।
:नाट्येनावतीर्णौ राजा सविस्मयं उपोढशब्दा
न रथांगनेमयः प्रवर्तमानं न च दृश्यते रजः अ
भूतलस्पर्शतया निरुद्धतस्तवावतीर्णोपि रथो
न लक्ष्यते मातलिः एतावानेव शतक्रतोरा
युष्मतश्च विशेषः राजा मातले कतमस्मिन्
प्रदेशे मारीचाश्रमः मातलिः वल्मीकार्द्धनि
मग्नमूर्तिरुरसा संदष्टसर्पत्वचा कंठे जीर्णलताप्र ल
तानवलयेनात्यर्थसंपीडितः अंसव्यापिशकु

शकुंत॰ कुंतनीडानिचितंबिभ्रज्जटामंडलंयत्रस्थाणुरि
७६ वाचलोमुनिरसावभ्यर्कबिंबंस्थितः राजा न
मस्तेकष्टतपसे मातलिः संयतप्रग्रहंरथंकृत्वा
महाराजएतावदितिपरिवर्धितमंदारवृक्षकां
प्रजापतेराश्रमंप्रविष्टौस्वः राजा स्वर्गादधिकत
रंनिर्वृतिस्थानममृतह्रदमिवावगाढोस्मि
मातलिः रथंस्थापयित्वाअवतरत्वायुष्मा
न् राजा अवतीर्य मातलेभवान्कथंइदानीं
मातलिः संयंत्रितोमयारथः वयमप्यवतरा
मः तथाकृत्वाइतः आयुष्मान्परिक्रम्य
दृश्यंतामत्रभवतामृषीणांतपोवनभूमयः

76

श्लो

ः राजा ननुविस्मयादेकथयामि प्राणानामनिले
वृत्तिःकल्पवृक्षवने तोये कांचनप
द्मरेणुकपिशे धर्माभिषेकक्रिया ध्यानं र
त्नशिलातलेषु विबुधस्त्रीसंनिधौ संयमो या
न्कांक्षंति तपोभिरन्यमुनयस्तस्मिंस्तपंत्य
मी मातलिः उत्सर्पिणी खलु महतां प्रार्थ
ना परिक्रम्याकाशे अयि वृद्धशाकल्य किंमा
नुतिष्ठति भगवान्मारीचः किंब्रवीषि दाक्षा
यण्यापतिव्रता धर्ममधिकृत्य पृष्टस्तस्यै मह
र्षिपत्नीसहिताय कथयतीति राजा कर्णं द
त्वा अये प्रतिपाल्यावसरः खलु प्रस्तावः मात

शकुं.त. लिः राजानमवलोक्य अस्मिन्नशोकवृक्षमूले
७७ तावदास्तामायुष्मान् यावत्त्वामिंद्रगुरवे निवेद
77 यितुमंतरान्वेषी भवामि राजा यथा भवान्मन्य
ते स्थितः मातलिः आयुष्मन् साधयाम्यहं नि
ष्क्रांतः राजा निमित्तं सूचयित्वा मनोरथाय
नाशंसे किं बाहो स्पंदसे वृथा पूर्वावधीरितं श्रे
यो दुःखं हि परिवर्त्तते नेपथ्ये मा खु चापलं क
रेहि कहं गदो एव्व अत्तणो पकिदिं राजा कर्णं
दत्वा अभूमिरियमविनयस्य को नु खल्वेष नि
षिध्यते शब्दानुसारेणावलोक्य सविस्मयं
अये को नु खल्वयमनुबध्यमानस्तपस्विनीभ्यां

अबालसत्वोबालः अर्द्धपीतस्तनंमातुराम
र्द्दक्लिष्टकेसरं प्रक्रीडितुंसिंहशिशुंबलात्का
रेणकर्षति ततःप्रविशतियथानिर्दिष्टक
र्मातपस्विनीभ्यांबालः १ जिंभसिंघदंताइंदेगण
इस्सं प्रथमा अविणीदकिंणोअपच्चणिवि
व्विसेसाणिसत्ताणिविप्पअरेसिहन्तवड्ढइदे
संरंभोठाणेखुइसिजणेणसव्वदमणोत्तिकि
दणामहेओसि राजा किंनुखलुबालेस्मिन्नौ
रसइवपुत्रेस्निह्यतिमेमनः नूनमनपत्यतां
मांवत्सलयति द्वितीया एसाखुकेसरिणी
तुमंलंघेदिजइसेपुत्तअंणमुंचेसि बालः सस्मि

शकुंतः ते अम्महे बालिअं खु भीदोम्हि अग्गरं दर्शयति रा
७८ जा महत्तेजसो बीजं बालोयं प्रतिभाति मे स्फु
78 लिंगावस्थया यावद् वह्निरेधापेक्षस्तथास्थितः प्रथमा
: बच्छ एदं बालमहूर्द ममं कस्स बरं देकीलणअं दा
इस्सं बालः कोहि देहि णं हस्तं प्रसारयति रा
जा कथं चक्रवर्तिलक्षणमप्यनेन धार्यते तथा
ह्यस्य प्रलोभ्यवस्तुप्रणय प्रसारितो विभाति
जालग्रथितांगुलिः करः अलक्ष्यपत्रान्तरमि
द्धरागया नवोषसाभिन्नमिवैकपंकजं द्वितीया
: सुब्बदे णासक्को एसोवाअमेत्ते णाविरमाविदु
जं गच्छ तुमं ममकेरए उडए मक्कडअस्स हत्तिकुमा

ष्मसवस्याचित्तिदोसित्तिआमोरउ विदुदित्तं।
सेउवहर प्रथमा तेहइत्तिनिष्क्रांता बालः इमि
णाएव्वदावकीलिस्सं तापसी विलोक्यहस
ति राजा स्पृहयामि खलु दुर्ललितायास्मै आ
लक्ष्यदन्तमुकुलाननिमित्तहासैरव्यक्तवर्णर
मणीयवचः प्रवृत्तीन् अंकाश्रयप्रणयिनस्त
नयान्वहन्तो धन्यास्तदंगरजसा मलिनीभवंति
तापसी होदु ण मं अअं गणेदि पार्श्वमवलोक्य
यत्ति को एत्थ इसिकुमाराणं राजा नमलोक्य
भद्दमुह एहि दाव मोएहि इमिणा दुम्मोअहत्थ
गाहेण डिंभलीलाए वाहिज्जमाणं बालमइंद

शकुं॰ अं राजा उपगम्य सस्मितं अयि भो महर्षिपु
१९ त्र एवमाश्रमविरुद्धवृत्तिना संयमः किमिति ज
79 न्मतस्त्वया सत्वसंश्रयसुखोऽपि दूष्यसि कुसुमस् ते
र्पीशिशुनेव चंदनं तापसी भद्रमुह ण खु अअं
इसिकुमारो राजा आकारसदृशं चेष्टित
मेवास्य कथयति स्थानप्रत्ययात्तु वयमे
वं तर्किताः यथाभ्यर्थितमनुतिष्ठन् बा
लस्पर्शमुपलभ्य आत्मगतं अनेन कस्या
पि कुलांकुरेणास्पृष्टस्य गात्रेषु सुखं ममैवं :
कां निर्वृतिं चेतसि तस्य कुर्याद्यस्यायमंकात्कृ:
तिनः प्ररूढः तापसी उभौ निर्वर्ण्य आश्चर्यं

ॐ १ राजा आर्ये किमिव नाम इमस्स बालस्स:
इस्सइवसंवंधसंवादिणीआकिदित्तिविम्हाविदा
दम्हि अपरिइदस्स वि दे अप्पडिलोमो संवुत्तो
त्ति राजा वालमुपलालयन् अये न मुनिकु
मारोऽयम् अथ कोऽस्य व्यपदेशः तापसी पुरुवं
सो राजा आत्मगतं कथमेकान्वयो मम
अतः खलु मदनुकारिणमेनमत्रभवती मन्यते। न्य
अस्त्येतत्पौरवाणामन्त्यं कुलव्रतं भुवनेषु
रसाधिकेषु पूर्वं क्षितिरक्षार्थमुशन्ति ये निवा
सं नियतैकपतिव्रतानि पश्चात्तरुमूलानि
गृहीभवन्ति तेषां ॥ प्रकाशं न पुनरात्मगत्या

शकुंत. मानुषाणामविषयः सानुमती अहमनु
८. मुहोभगसमादि अष्सरासंबंधेनाहमस्मबाला
४० त्सजनयायरौसुदेवगुरुणोनम्बोधयतोपस्तुर
  रक्षा अपवार्य हंतद्विनीयमाशाजननं प्रष्टा. का
मान्वभवतीकिमारव्यस्यराजर्षेः पत्नी नो। प
प= सी कोनस्य धर्मदारपरित्यागिनो नामसंकीर्ति
तुं चिंतिस्सदि राजा स्वकाते इयंखलुकथामा
मेवलदीकरोति यदिनावदस्यशिशोर्माता
नामनिरंपृच्छामि अथवा नार्यमार्यपरदार
व्यवहारः प्रविश्यमृन्मयरहस्तानापसी २ स ता
र्वदमयरसउंदलावण्यंपेक्ख बालः सदृष्टी
हि

रा॰

पं॰ कहिंवामेम्प्रज्ञ॰ उभे राणमसारिद्वे देवंविदोमा
उवत्सलो द्वितीया वछरमत्त्यकिंमिच्चामश्रो
स्सरम्मत्तरादे वत्वंतिग्रणीयेसि राजा मात्त
गत्ते किंवाशकुंतलोत्थस्यमानुरारव्या संलिंग
तेनाम धेयसाहश्यातिम्रपित्रामम्ट्गत्तासि
केवलामममात्रप्रत्तावोमेविषादायकल्पते वा
लः मद्भुएरोग्रादिमेएसोभट्टमारकोक्रीडनी
यकमादत्ते प्रभा॰ पविलोकासोडेंगयम्हेरकेत्ना
कारडअमाथेयेसेरादीसर्वराजा ममलमलको
वेगनमाद्वि मस्यासिंहशावविमर्दात्परिभ्रष्टं
ग्राहानुपिपृच्छति उभे मारवु १ इंदंम्रवलंविश्र ३

शाकुंत॰ ःकहंगहिदेसोणरागविस्मयान्नुरोनिहितमहस्तोपम
८२ स्परमवलोकयन्: राजा किमर्थंप्रतिविद्ध
81 स्म: प्रथमा सुणादुमहाराओ एसक्खुवराजि
दारागमओसही इस्सजादकम्मसमए भअवदा
मारीएण दिण्णा एदंकिलमादापिदरोअप्पा
णांचवज्जिअअवरोभूमिपडिदंणगेण्हदि राजा
ःअथगृह्णाति प्रथमा तदोतंसप्पोभविअडं
सइ राजा भवतीभ्यांकदाचिदस्याःप्रत्यक्षी
कृताविक्रिया उभे अणेअसो राजा सहर्ष
मात्मगतं कथमिवसंपूर्णमपिमेमनोरथं
नाभिनंदामिबालंपरिष्वजते द्वितीया सुव्व

देहि हिंसंवुत्तंतं गाग्गिअमद्धाउडा एस उंदलोमएलि
वेदंम्ह इति निष्क्रांते वालः मुंचेमंजाव कुमारद्
एसक्कासिंगच्छामि राजा उत्क्षका सहेवमा
मम अभिनंदयिष्यासि वालः ममरवु ताद्दोडुः
संसदोरपलुमं राजा सात्मितं एषा विवादएव
प्रत्यायया नि ततः प्रविशत्यैवं केशी धराशी।
कुंतला किमारकालेविपकि दिठुं सव्वद मरा
सउ सहिंदारिक्कारामेक्कासक्कासिक्कतराो
मात्कापेक्ष क्कएवाज कसाराफमदीक्काव किव
दाहसंभावीक्कादि एदं राजा शकुंतलां विलोक्य
क्कयेसेयमत्र भवतीशकुंतला यैका वसतेपरिघ

२२

शाकुं॰ ८२ सरे वसाना नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरह
व्रतं बिभर्त्ति शकुंतला पश्चात्तापविवर्णं रा॰
जानं दृष्ट्वा णं खु अज्जउत्तो विअ तदो को एसो॰
दाणिं किदरक्खामंगलं दारअं मे गत्तसंसग्गेण
दूसेदि बालः मातरमुपेत्य अज्जुए एसो को वि
पुरिसो मं पुत्तो त्ति आलिंगदि राजा प्रिये क्रौर्य
मपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तं
यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं
पश्यामि शकुंतला आत्मगतं हिअअ समस्सस
परिच्चत्तमच्छरेण अणुकंपिदह्मि देव्वेण अज्ज

उत्तोरखुएसो राजा प्रिये स्मृतिभिन्नमोहतमसो
दिष्ट्या प्रमुखे स्थितासि सुमुखि उपरागान्ते श
शिनः समुपगता रोहिणी योगं शकुंतला जेदु
अज्जउत्तो इत्यर्द्धोक्ते वाष्पकंठी विरमति राजा
सुंदरी वाष्पेण प्रतिषिद्धेपि जयशब्दे जितं म
६= या यत्ते दृष्टमसंस्कारपाटलोष्ठपुटं वदनं बालः १८
अज्जु एको एसो शकुंतला वच्छ दे भाअधेआ
इं पुच्छ राजा शकुंतलायाः पादयोः प्रणिपत्य
सुतनु हृदयात्प्रत्यादेशव्यलीकमपैतु ते कि म
पि मनसः संमोहो मे तदा बलवानभूत् प्रबल
तमसामेवंप्रायाः शुभेषु हि वृत्तयः स्रजमपि

शकुंत॰
८३
83

शिरस्संयमः दिसमां घुतोत्पाहि शंकया शाकुंतला
: उट्ठेदु अज्जउत्तो णूणं मे सुच्चरिदप्पडिबंधकं
पुराकिदं तेसु दिअसेसु परिणामसुहं आसि
जेण साणुक्कोसो वि अज्जउत्तो मइ विरसो संवु-
त्तो राजा उत्तिष्ठति शाकुंतला अह कहं का हि
अज्जउत्तेण सुमरिदो दुःखभाई अअं जणो
राजा उद्धृतविषादशल्यः कथयिष्यामि
मोहान्मया सुतनु पूर्वमुपेक्षितस्ते यो बाष्प-
बिन्दुरधरं परिबाधमानः तं तावदाकुटिलपक्ष्मवि-
लग्नमद्य बाष्पं प्रमृज्य विगतानुशयो भवे-
यं यथोक्तमनुतिष्ठति शाकुंतला नाममु-

द्दाकुटिः

ङ्गं दृष्ट्वा शक्राउतारे देवे अंगुलीयकं राजा अ:
स्मादंगुलीयोपलंभात्खलु स्मृतिरुपलब्धा :
शकुंतला विस्रंभात्किं दर्शितानेन शक्राउत
रस्स पव्वस्स काले दुल्लहं आसि राजा तेन ऋतुस
मवायचिन्हं प्रतिपद्यतां लता कुसुमं शकुंत
ला ग्रासेविस्ससामि अज्जउत्तो एव्वेसं धारे
दु ततः प्रविशति मातलिः मातलिः दिष्ट्या
धर्मपत्नीसमागमेन पुत्रमुखदर्शनेन चायु
ष्मान्वर्द्धते राजा अभवत्सम्पादितस्वादुफ
लो मे मनोरथः मातले न खलु विदितोऽयमा
खंडलेन वृत्तान्तः स्यात् मातलिः सस्मितं कि
ले

शीष्यः इतः परोहं एह्यायुष्मान् भगवन्मारीच
स्लेदर्शनं वितरत्ति राजा। शकुंतलेऽवलंब्यतां
पुत्रः त्वां पुरस्कृत्य भगवंतं द्रष्टुमिच्छामि श
कुंतला। हिरिआमि अज्जउत्तेण सह गुरुस
मीपं गंतुं राजा। अपि आचरितव्यमभ्युदय
कालेषु एह्येहि सर्वे परिक्रामंति ततः प्रवि
शत्यदित्या सार्धमासनस्थो मारीचः राजा।
नमवलोक्य दाक्षायणि। पुत्रस्य ते रणशिरस्य। ब
यग्रयायी दुष्यन्त इत्यभिहितो भुवनस्य भ
र्ता चापेन यस्य विनिवर्तितकर्मजातं तत्
कोटिमत्कुलिशमाभरणं मघोनः अदितिः

संभावणीआणुभावा से आकिदी मातलिः
आयुष्मन् एतौ पुत्रप्रीतिपिशुनेन चक्षुषा
दिवौकसां पितरावायुष्मन्तमवलोकयतः।
तावुपसर्प राजा मातले एतौ प्राहुर्द्वादशधा
स्थितस्य मुनयो यत्तेजसः कारणं भर्तारं भु
वनत्रयस्य सुषुवे यज्ञभागेश्वरं यस्मिन्नात्म
भवः परोपि पुरुषश्चक्रे भवायास्पदं द्वंद्वं दक्षम
रीचिसंभवमिदं तत्स्रष्टुरेकांतरं मातलिः
अथ किं राजा उभाभ्यामपि वासवनियो
ज्यो दुष्यन्तः प्रणमति मारीचः वत्स चिरं जी
व पृथिवीं पालय अदितिः वच्छ अप्पडिरहो होहि

हि शकुंतला दारकसहिदा वोपादवंदणं क-
रेमि मारीचः वत्से आखंडलसमो भर्त्ता जयं ता:
तप्रतिमः सुतः आशीरन्या न ते योग्या पौलो-
म्यासदृशीभव अदितिः जादे भत्तुणो अभि-
मदा होहि अवस्सं दीहाउ वच्छो उहअकुलणं-
दणो होदु उवविसह सर्वे प्रजापतिमभितः उ-
पविशंति मारीचः एकैकं निर्दिशन् दिष्ट्या
शकुंतला साध्वी सदपत्यमिदं भवान् श्रद्धा
वित्तं विधिश्चेति त्रितयं तत्समागतं राजा भ-
गवन्प्रागभिप्रेतसिद्धिः पश्चाद्दर्शनं अतोऽपू-
र्वः खलु वोनुग्रहः कुतः उदेति पूर्वं कुसुमं ततः

फलंघनोदयः प्राक्तदनंतरं पयः निमित्तनै
मित्तिकयोरयं क्रमस्तवप्रसादस्यपुरस्तुसं
पदः मातलिः एवंविधातारः प्रसीदंति राजा
भगवन्निमामाज्ञाकारीं वो गांधर्वेण विवाहविधि
नोपयम्यकस्यचित्कालस्यबंधुभिरानीतां
स्मृतिशैथिल्यात्प्रत्यादिशन्नपराधोस्मित
त्रभवतोयुष्मत्सगोत्रस्यकण्वस्यपश्चादंगुली
यकदर्शनादूढपूर्वांतद्दुहितरमवगतोहं त
च्चित्रमिवमेप्रतिभाति यथागजोनेतिसमक्ष
रूपेतस्मिन्नतिक्रामतिसंशयःस्यात् पदा
निदृष्ट्वातुभवेत्प्रतीतिस्तथाविधोमेमनसोवि

शाकुंत. कारः॥ मारीचः॥ वत्स अलमात्मापराधशंकया
८६ सम्मोहोपि त्वय्यनुपपन्नः॥ श्रूयतां॥ राजा॥ अ
वहितोस्मि॥ मारीचः॥ यदैवाप्सरस्तीर्थावतरणात्
प्रत्यक्षवैक्लव्यां शकुंतलामादाय मेनका दा
क्षायणीमुपगता तदैव ध्यानादवगतोस्मि
दुर्वाससः शापादियं तपस्विनी सहधर्मचारि
णी त्वया प्रत्यादिष्टा नान्यथेति स चायमंगु
लीयकदर्शनावसानः॥ राजा॥ सोच्छ्वासं॥ एष व
चनीयान्मुक्तोस्मि॥ शकुंतला॥ स्वगतं॥ दिट्ठि
आ अकारणपच्चादेसी ण अज्जउत्तो ण हु सत्तं
अत्ताणं सुमरेमि अहवा पत्तो मए एस सहिआ वा वि

रहस्यमहिम्नश्चाग्रे ये विविदोजादोसहीहिंसांदि
हुन्हि भगवतोऽङ्गुलीकमदंसद्रवन्ति मारीचः
वः वनेचरितानां सिसृक्षधर्मचारिणां प्राप्तिव
चयामन्युः कार्यः पश्यपशापादासिप्राणिहन्ता
स्मृतिरोधमहितैर्भगवर्थवशानमामित्रभूतानि चैव
ध्यायानमूर्छीतितिमलोपहृतैर्प्रसादेष्वभ्यर्चकपा
नलोलुसलभावकाश्या राजा भगवद्वत्वरवलु
वैरप्रतिष्ठा मारीचः तस्याभाविलमेनं चक्र
८ वर्तिनमवगच्छतु भवान् पश्यायमेतान् द्वाव ११
स्त्रिमितनगानितनानीरपतिमिलाधिपः पुरासप्तद्वीपा
जयन्तिवसुधामप्रतिरथ्यः इहायं सत्वानां प्रस

शकुंत· भद्रमनात्मसर्वदमनः पुनर्यास्यत्यारख्यांभर.
८७ नेश्नलोकस्य भवतां प्रजा भक्ताकृत ग
संस्कारे सर्वमास्मिन्वयमाशास्महे अदितिः
87 भव्यंवयमाएदुहहिदमरागोरहसंपन्नीएक.
स्तौविरावत्सुदार्वि रोकरीस्मद्दुहितिवत्सल
मराश्राइहएम्बुउपवरंती विवुई शकुंतला.
आत्मगतं मरणोरहोमनुमेभणिएभवती दे
ए मारीचः तपःप्रभावात्प्रत्यक्षंसर्वमेवत
त्रभवतः राजा अतः खलुममनातिक्रुद्धोमु
निः मारीचः तथाप्यस्माभिःप्रयुक्तः को
त्रभोःप्रविश्यशिष्यःभगवन्नयमस्मि स्मा.

रिविः मत्तवइदतीमेवविहितयत्नागतममव
क्तमात्र भगवते काशावाय श्रियमावेदयदथ्वा
पुत्रक्रीशकुंतलानशाखानिकुतोरमटतिमा
तादुर्ध्यंतेन प्रतिगृहीतेति शिष्यः यदाज्ञा
पयति भगवानिति निष्क्रांतः मारीचः वत्स
त्वमपि स्वापत्यदारसहितः सख्युराखंडलस्य
१ रथमारुह्येति राजधानीप्रतिष्ठस्व राजा यथा
ह्याज्ञापयति भगवान् मारीचः अपि च तव
भवतु विडौजाः प्राज्यवृष्टिः प्रजास्त्वमपि वित
तयज्ञः स्वर्गिणोभावयालं युगशतपरिव
र्तनैवमन्योन्यकृत्यैर्नयतमुभयलोकानु

१२

मनहस्पाघलीयै: राजा भगवान्यथशक्त्यास
त्मि प्रयसेतीतिष्ये मारीचः किंते भूयः
प्रियमुपहरामि राजा अतः परमपि प्रियम
स्ति यदि हि भगवान्प्रियं कर्त्तुमिछति तर्हि
इदमस्तु भरतवाक्यं प्रवर्त्ततां प्रकृतिहिताय पा
र्थिवः सरस्वती श्रुतिमहती महीयतां मम
पि च क्षपयतु नीललोहितः पुनर्भवं परिगतश
क्तिरात्मभूः इति निःक्रान्ताः सर्वे सप्तमोंकः
इति श्री कालिदासकृत शकुंतलानाटकम्
पुस्तकं समाप्तं श्रीरस्तु लेखक^योः संवत् १९
९६ ज्येष्ठशुक्ले अष्टम्यां शुक्रवासरे प्र० ११न·

पाठक

नं. ११२

२-१-३६
१३-२-३६

८६

नं. ४२२ शाकुन्तलानाटकं